© 2017 IJSRST | Volume 3, Issue 7, September-October-2017
Print ISSN: 2395-6011 | Online ISSN: 2395-602X | Page No 1401-1404

# प्राच्यग्रन्थेषु शिक्षायाः सम्प्रत्ययः



**डॉ. नीलाभ तिवारी**
**असिस्टेन्ट प्रोफेसर, श्रीसदाशिवपरिसर राष्ट्रियसंस्कृतसंस्थानम् पुरी परिसर, ओडीसा**



**ललित मोहन पन्तोला**
शोध छात्र, शिक्षा शास्त्र विभाग, राष्ट्रीय संस्कृत संस्थान भोपाल परिसर, भोपाल (मध्यप्रदेश)

**शोधालेखसार :–** श्रौतसूत्रे, गृह्यसूत्रे, धर्मसूत्रे, स्मृतिषु, रामायणे, महाभारते इत्यादिप्राचीनग्रन्थेषु वेदाङ्गशब्दस्योल्लेखः नैकस्थानेषु मिलति। शिक्षा वेदाङ्गेषु प्रथमा इति पूर्वमपि स्पष्टम् । शिक्षायाम् अक्षराणां यल्लक्षणं यथोच्चारणं च वर्णितं तस्य तेनैव प्रकारेण अक्षराणामुच्चारणैः मन्त्रपाठस्योल्लेखः पुराण–रामायण–महाभारतादिग्रन्थेषु नैकत्र मिलति।

**मुख्य शब्द :–** श्रौतसूत्रे, गृह्यसूत्रे, धर्मसूत्रे, स्मृतिषु, रामायणे, महाभारते।

---

'नूनं सा ते प्रति वरं जरित्रे दुहियादिन्द्रे दक्षिणामद्योनी।
शिक्षा स्तोतृभ्ये भाति धग्भगो नो वृहद्वदेम विदधे सुयोगः''।।[1]

सर्वादौ ऋग्वेदे शिक्षाशब्दः प्रयुक्तो विद्यते। अतः परं शिक्षेति शब्दः बहुत्र प्रयुक्तः शिक्षासु वर्ण्यविषयं तु प्रागैवुक्तं शोधकर्त्रा तथापि शिक्षा कथमागता ? शिक्षायाः सम्बन्धः केन सह? शिक्षाशास्त्रं नाम किम् ? मनोभाषिकतत्वानि कुत्र एतेषु शिक्षाग्रन्थेषु एतद्सर्वम् इदानीं विचार्यते। अधुना शिक्षेति शब्देन शिक्षणविधिसम्बन्धितशास्त्रस्य अर्थ गृह्यते। शब्दोऽयं ऑङ्लभाषायाः (Education) इति शब्दस्यानुवादः। परञ्चात्र अनेन प्राच्यशास्त्रानुगुणं षडङ्गशास्त्रेषु प्रथमं शास्त्रं शिक्षा इति वाचकत्वेन स्वीकृतमस्ति। यद्यपि अस्य शब्दस्य व्याख्या द्विधा प्राच्यपाश्चात्ययोः अनुगुणं करिष्यते। तथापि पूर्वं प्राच्यदृष्टिः आवश्यकीति। पाश्चात्यशिक्षाशास्त्रे शिक्षणसम्बन्धिविचाराणां प्राबल्यं वर्तते यथा अधिगमः कथं जायते ? वयं कथं जानीमः? शिक्षणम् उत्तमरीत्या केन प्रविधिना स्यातादीनां चिन्तनमाधिक्येन भवति अतः अस्य नाम शिक्षणशास्त्रमिति अधिकोपयुक्तम्। तथैव शिक्षाशास्त्रम् अस्माकं प्राचीनं शास्त्रं वेदाङ्गशास्त्रम् इत्यर्थे अधिकोपयुक्तम्। तथैव शिक्षाशास्त्रम् अस्माकं प्राचीनं शास्त्रं वेदाङ्गशास्त्रम् अधिकोपयुक्तं यत्र बहुधा शिक्षेति शब्दः समागतः। वेदाङ्गशास्त्राणाम् इदानीं परिचयः आवश्यकः येन अग्रे शिक्षेति शब्दस्य सुष्ठुरीत्या वर्णनं भवेत्।

वेदाङ्गेषु शिक्षायाः सम्प्रत्ययः –

वेदाङ्गानां सङ्ख्या षड मन्यते। तेषां प्राचीनतमः क्रमबद्धोल्लेखः मुण्डकोपनिषदि मिलति यथा –

**'तस्मै स होवाच विद्ये वेदितव्ये इति ह स्म यद् बह्मविदो वदन्ति परा चैवाऽपरा च। तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।**[2]

**षडङ्गो वेदः, छन्दः कल्पो व्याकरणं ज्योतिषं शीक्षाच्छन्दोविचितिरिति।**[3]

कातीयगोत्रचरणपृच्छाप्रतिज्ञासूत्रे वेदाङ्गानां क्रमबद्धोल्लेखः मिलति यं वयमधुना जानीमः।

**'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि।**[4]

वेदाङ्गानामुल्लेखः श्रौतसूत्रे, गृह्यसूत्रे, धर्मसूत्रे, स्मृतिषु, पुराणेषु रामायणे, महाभारतादिप्राचीनग्रन्थेषु प्राप्यते। सर्वाणि वेदाङ्गानि वेदैः स्वीकृतानि सन्ति। अस्य प्रमाणं ऋग्वेदप्रातिसाख्यस्य वर्गद्वयवृत्तौ प्रतिपादितं वर्तते। वस्तुतः मन्दमतिभ्यः वेदस्वरूपप्रयोगार्थरहस्यादीनां सारल्येन अवगाहनाय मुनिभिरेतानि वेदाङ्स्वरूपाणि सोपानानि चोक्तानि। अस्य प्रमाणं यास्कः निरुक्ते प्रददाति।

**'साक्षात्कृतधर्माण ऋषयो बभवुस् तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुरवेदं च वेदाङ्गानि च'।**[5]

**शिक्षायाः विशिष्टः परिचयः –**

**'एतद्देश प्रसूतस्य सकाशादग्रजन्मनः**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**[6]

उपरि प्रदत्तविश्लेषणानुसारं मुण्डकोपनिषदः क्रमेण खलु शिक्षा षडवेदाङ्गेषु प्रथमः वेदाङ्गः। वेदः वर्णराशिस्वरूपः वर्णाश्च वेदस्य अतिलघुः प्रारम्भिकाश्चावयवास्सन्ति। शिक्षा वर्णानामुच्चारणेण सम्बन्धिता भवति। अनेन हेतुना शिक्षायाः वेदाङ्गेषु प्रथमं स्थानं स्वाभाविकं भवति। शिक्षाशास्त्रस्तु व्याकरणशास्त्रेणापि पूर्वावश्यकं तत्त्वम्। अस्य प्रमाणं पाणिनीयव्याकरणस्य भाष्यकारेण पतञ्जलिमुनिना प्रदत्तम्।

**'व्याकरणं नामेयमुत्तरा विद्या। सौऽसौ छन्दश्शास्त्रेष्वभिविनीत् उपलब्धाऽधिगन्तुमुत्सहते'।**[7]

पदेऽस्मिन् छन्दश्शास्स्त्रेषु इत्यस्यार्थः नागोजीभट्टेन प्रातिशाख्यशिक्षादिषु कृतमस्ति। अन्याभिः उत्पत्तिभिरपि शिक्षाशास्त्रं व्याकरणशास्त्रात्पूर्वं समागतमिति प्रतिभाति।

शिक्षायाः लक्षणानि विविधविद्वभिर्स्वीयमतानुगुणं पृथग्पृथग्कृतमस्ति। शङ्करभगवत्पादेन तैत्तिरीयोपनिषदः **'शीक्षां व्याख्यास्यामः'** उक्तिव्याख्यायां **शिक्षा 'शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम्'** इत्युक्तम्। राजशेखरकविना काव्यमीमांसायाः द्वितीयेऽध्याये **वर्णानां स्थानकराप्रयत्नादिभिर्निष्पत्तिनिर्णायिनी शिक्षा आपिशलीयादिका** इत्युक्तम्। आपस्तम्बधर्मसूत्रस्य व्याख्यां हरदत्तेन **'शीक्षां वर्णानां स्थानकरणप्रयत्नादिकमध्ययनकाले कर्मणि च**

**मन्त्राणुच्चारणप्रकारं शिक्षयतीति पृषेदरादित्वाद्दीर्घः'** इत्युक्तम्। ऋग्वेदव्याख्याभूमिकायां सायणेन **'वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षेति'** लक्षणं कृतं वर्तते। कातीयगोत्रचरणपृच्छाप्रतिज्ञासूत्रे इत्युत्वा शिक्षारूपीवेदाङ्गस्य परिचयः प्रतिपादितम्।

**'तत्र शिक्षा नाम स्वरसंस्कार – लघुगुरुवनुनासिकाऽनुस्वार – पिण्डविसर्जनीय – दन्त्यमूर्धन्य – तालव्यकण्ठ्योष्ठ्यमाऽनुस्वाराणां यज्ञस्वरूपयज्ञस्वरसंस्कारयोश्चोच्चारणार्थं शिक्षा' ।**[8]

तैत्तरीयोपनिषदि **'शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। सामः सन्तानः। इत्युक्तः शीक्षाध्यायः'।** अमुं वचनम् अनुश्रित्य हि शिक्षायाः लक्षणम् उचितं प्रतिभाति तदनुसारं यस्मिन् शास्त्रे अकारककारादिवर्णाः उदात्तानुदात्तादिस्वराः, ह्रस्वदीर्घादिमात्राः, स्थान–करण–प्रयत्नाऽनुप्रदानरूपबलम् उच्चारणमाधुर्यादिरूपसामः, तथा च वर्णप्रश्लेषविकार– लोपाऽऽगमादिरूपपदसन्धिः तत्सम्बद्धाः अन्यविषयाः निरूपिताः भवन्ति सैव शिक्षा उत शिक्षाशास्त्रम्। एतदतिरिच्य शिक्षाशास्त्रस्य लक्षणविषये वर्णस्वरयोः सम्बन्धे कौण्डिन्नयायनशिक्षायाम् उक्तम् –

**वर्णानां च स्वराणां च मात्राया बलसाम्ययोः**
**पदान्ताऽऽद्योः संहितायाः विचारो यत्र लभ्यते।**
**तत्सम्बद्धाश्चाऽपरेऽपि विषया यत्र वर्णिताः**
**भवन्ति सा हि प्रथमा विद्या शिक्षेति भाषिता।।**[9]

**शिक्षायाः प्रयोजनम् –**

भारते पुराकालादेव शिक्षायाः विशिष्टं प्रयोजनं वृणुते। अत्र शिक्षायाः प्रमुखं प्रयोजनं वेदानाम् उच्चारणशुद्धेर्रक्षणं वर्तते। यज्ञादिषु वेदमन्त्राणां शुद्धोच्चारणाय वेदध्येतृभ्यः तादृशं सामर्थ्यप्रदानं येन ते शुद्धोच्चारणं कर्तुं शक्ष्येयुः यस्मात् मन्त्राणां यथोक्तं फलदायित्वं स्यात्। इयमेव वार्ता पाणिनीयशिक्षायाम्, चारणीयशिक्षायाम्, नारदीयशिक्षायाम्, पाणिनीयव्याकरणमहाभाष्ये च समागताऽस्ति।

**मन्त्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**[10]

एतदतिरिच्य यत्र सामान्यविद्यार्थिभ्यः शुद्धोच्चारणस्यावश्यकता आदर्शवाचनार्थं भवितुमर्हति तत्रैव भाषाशास्त्रिभ्यः विश्वस्य विविधभाषासु वर्णानां मौलिकं यथार्थञ्च ज्ञानप्रदानमपि शिक्षायाः प्रयोजनं शक्यते।

**भारते शिक्षायाः उद्भवः विकासश्च –**

भारते सर्वाषां विद्यानां मूलोद्भवस्थानं वेदः मन्यते। वेदानां मन्त्रसंहिता ब्राह्मणाश्च द्वौ भागौ स्तः। मन्त्रसंहितायाः मन्त्राणां संग्रहः ब्राह्मणे पुनः भागद्वयं वर्तते कर्मकाण्डं ज्ञानकाण्डञ्च। कर्मकाण्डस्य हि अपरं नाम ब्राह्मणः एवञ्च ज्ञानकाण्डस्य अपरं नाम आरण्यकम् उत उपनिषद्। कुत्रचिद् आरण्यकउपनिषदोः भेदः नास्ति

© 2017 IJSRST | Volume 3, Issue 7, September-October-2017
Print ISSN: 2395-6011 | Online ISSN: 2395-602X | Page No 1401-1404

तत्र आरण्यकोपनिषद् यथा बृहदारण्यकोपनिषद् संयुक्तरूपेण नाम गृह्यते। तथापि कैश्चन जनैः ज्ञानकाण्डस्य उपासनापरकभागम् आरण्यकः तथा च ज्ञानपरकभागम् उपनिषद् इति संज्ञा विहिता। परञ्च अत्र शंका न भाव्या यतः उपनिषदः आरण्यकेव अन्तर्भवन्ति। अनेन हेतुना मनुस्मृतिमहाभारतप्रभृतिप्राचीनग्रन्थेषु आरण्यकनाम्नैव उपनिषदामुल्लेखः कृतो भवति।

शिक्षाशास्त्रनामसिद्धान्तं वेदानां मन्त्रसंहितासु प्राप्यते। ब्राह्मणग्रन्थैस्तु शिक्षायाः सिद्धान्तसूत्राण्यैव चितानि। शिक्षायाः प्रधानविषयाणां निर्देशनकर्ता **शीक्षा व्याख्यास्यामः** इत्यादिप्रकरणानि तैत्तरीयारण्याद् समुधृतानि छान्दग्योपनिषदि स्वराणां महाप्राणप्रयत्नस्य विधानं वर्तते। मुण्डकोपनिषदि शिक्षायाः प्राथम्येन उल्लेखः कृतः। अथर्ववेदस्य गोपथब्राह्मणे **'षडङ्गविदस् तत् तथाऽधीमहे'** वाक्येस्मिन् वेदस्य षडङ्गानामुल्लेखः वर्तते। तत्र शिक्षासम्बन्धि–वर्ण–अक्षर–मात्रा–स्थान–करणुदात्त–स्वरितश्चादयः पारिभाषिकशब्दाः मिलन्ति।

मन्त्रब्राह्मणात्मकाः वेदः भारतीयमनीषिणां मते अनादीति। अस्याविर्भावकालः निश्चितः नास्ति। पाश्चायविद्वान्सः तेषामनुयायिनश्च वेदानां रचनाकालः इतः 6000–3000 पूर्वं यावत् स्वीकुर्वन्ति। तेष्वेव केचन पाश्चात्याः प्राच्याश्च 6000, 8000, 9000, 27000, 77000 इत्यपि वेदानां रचनाकालं स्वीकुर्वन्ति। वस्तुतः आधुनिकवैचारिकाणां मतेऽपि वेदाः प्रागैतिहासिककालस्य भूते सत्यपि तेषां कालनिर्णयः अशक्येति।

श्रौतसूत्रे, गृह्यसूत्रे, धर्मसूत्रे, स्मृतिषु, रामायणे, महाभारते इत्यादिप्राचीनग्रन्थेषु वेदाङ्गशब्दस्योल्लेखः नैकस्थानेषु मिलति। शिक्षा वेदाङ्गेषु प्रथमा इति पूर्वमपि स्पष्टम् । शिक्षायाम् अक्षराणां यल्लक्षणं यथोच्चारणं च वर्णितं तस्य तेनैव प्रकारेण अक्षराणामुच्चारणैः मन्त्रपाठस्योल्लेखः पुराण–रामायण–महाभारतादिग्रन्थेषु नैकत्र मिलति। परस्माकं शिक्षाशास्त्रस्य मूलं तु प्रातिशाख्यग्रन्थाः, अतः परमेव उपनिषद्–ब्राह्मण–रामायण–व्याकरणादिविविधशास्त्राणि समागतानि। अतः भारते शिक्षाशास्त्रस्य उद्भवः तु वेदप्रातिशाख्येभ्यो एवास्ति ततः परं विविधलोकसाधारणग्रन्थाः रचिताः अतः इदानीं प्रातिशाख्यानां परिचयः आवश्यकः।

सन्दर्भग्रन्थः–

1. ऋग्वेदः 2/16/9
2. मुण्डकोपनिषद् 1/45
3. आपस्तम्बधर्मसूत्रम् 2/4/1/11
4. कण्डिका 4/4
5. निरुक्तम् 1/6/5
6. मनुस्मृतिः 2/20
7. पाणिनिव्याकरणस्य पतञ्जलिभाष्ये 1/2/32
8. **पञ्चविंशकण्डिकासूत्र. 1**
9. **कौण्डिन्नयायनशिक्षायाः 2,3**
10. पाणिनीयव्याकरणभाष्ये प्रथमध्याये प्रथमाह्निके।